भावयमानः, बिभावयिषमाणः ; भावयिष्यमाणः, बिभावयिषिष्यमाणः, बिभावयिट्-यिषौ-यिषः ; [A]भावितम्-तः, बिभावयिषितः-तवान् ; भावः, [1]भावुकः, [2]भावनः, बिभावयिषुः ; भावयितव्यम्, बिभावयिषितव्यम् ; भावनीयम्, बिभावयिषणीयम्; भाव्यम्, बिभावयिष्यम् ; ईषद्भावः-दुर्भावः-सुभावः ; ईषद्बिभावयिषः-दुर्बिभावयिषः-सुबिभावयिषः; भाव्यमानः, बिभावयिष्यमाणः ; भावः, बिभावयिषः ; भावयितुम्, बिभावयिषितुम् ; भावना, बिभावयिषा ; भावनम्, बिभावयिषणम् ; भावयित्वा, बिभावयिषित्वा; प्रभाव्य, प्रबिभावयिष्य ; भावम् २, भावयित्वा २, बिभावयिषम् २ ; बिभावयिषित्वा २. इति रूपाण्यस्य भवन्ति ।

(1165) "भू सत्तायाम्" (I-भ्वादिः-1. अक. सेट्. पर.)

'सत्तायां भवति, प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव, भावयत्यवकल्कने ॥' (श्लो. 3) इति देवः ।

भावकः-भाविका, भावकः-विका, [3]बुभूषकः-षिका, बोभूयकः-यिका ; भविता-त्री, भावयिता-त्री, बुभूषिता-त्री, बोभूयिता-त्री ; परिभवन्-न्ती, [4]सुखमनुभवन् वर्धस्व, शुश्रूषुर्भवन् विद्यामधिकरोति,

---

1. तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु 'लषपतपदस्थाभूवृष—' (3-2-154) इत्यनेन उकञ्प्रत्ययः। 'णेरनिटि' (6-4-51) इति णिलोपः। 'न वाचमवमन्यन्ते नर्तकीमिव भावुकाः॥' (या. अ. 1-7) इत्यत्र, "भावुकाः= भावनाकृतो भगवद्भक्ताः। 'भुवोऽवकल्कने' इति भवतेर्णिजन्तात् 'लषपत—' (3-2-154) इत्यादिना उकञ्प्रत्ययः। 'अवकल्कनम्=चिन्तनम्।' इति व्याख्यातम्।" इति अप्पय्यदीक्षितोक्तेः धातोरस्यैवोकञ्विधायके सूत्रे ग्रहणमित्यपि ज्ञायते।

2. ण्यन्तादस्मात् नन्द्यादेराकृतिगणत्वात् कर्तरि ल्युः। भावनः= चिन्तकः। (अत्र भावितम् इति मिश्रीकरणार्थे धातोर्वृत्तिरिति ज्ञेयम्)

3. 'सनि ग्रहगुहोश्च' (7-2-12) इतीणिनषेधः। अभ्यासे ह्रस्वः। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।

4. सुखमनुभवन्, शुश्रूषुर्भवन् इत्यत्र क्रमेण लक्षणार्थे हेत्वर्थे च, 'लक्षणहेत्वोः क्रियायाः' (3-2-126) इति शता।

A. 'रोषान्ध्यभावितमसृग्भिरकल्पयत् तं
कृष्णोऽपि नाकिजनराकितलाग्यवीर्यः॥' धा. का. 3.41.